श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे एकोनविंशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे एकोनविंशोऽध्यायः ॥

श्रीशुक उवाच
किम्पुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं
सीताभिरामं रामं तच्चरणसन्निकर्षाभिरतः
परमभागवतो हनुमान् सह किम्पुरुषैरविरत -
भक्तिरुपास्ते ॥ 1 ॥

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां
परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति
स्वयं चेदं गायति ॥ 2 ॥

ओं नमो भगवते उत्तमश्लोकाय नम आर्यलक्षण -
शीलव्रताय नम उपशिक्षितात्मन उपासितलोकाय नमः
साधुवादनिकषणाय नमो ब्रह्मण्यदेवाय
महापुरुषाय महाराजाय नम इति ॥ 3 ॥

यत्तद्विशुद्धानुभवमात्रमेकं
स्वतेजसा ध्वस्तगुणव्यवस्थम् ।
प्रत्यक् प्रशान्तं सुधियोपलम्भनं
ह्यनामरूपं निरहं प्रपद्ये ॥ 4 ॥

मर्त्यावतारस्त्विह मर्त्यशिक्षणं
    रक्षोवधायैव न केवलं विभोः।
कुतोऽन्यथा स्याद्रमतः स्व आत्मनः
    सीताकृतानि व्यसनानीश्वरस्य॥ 5॥

न वै स आत्माऽऽत्मवतां सुहृत्तमः
    सक्तस्त्रिलोक्यां भगवान् वासुदेवः।
न स्त्रीकृतं कश्मलमश्नुवीत
    न लक्ष्मणं चापि विहातुमर्हति॥ 6॥

न जन्म नूनं महतो न सौभगं
    न वाङ् न बुद्धिर्नाकृतिस्तोषहेतुः।
तैर्यद्विसृष्टानपि नो वनौकस -
    श्चकार सख्ये बत लक्ष्मणाग्रजः॥ 7॥

सुरोऽसुरो वाप्यथ वानरो नरः
    सर्वात्मना यः सुकृतज्ञमुत्तमम्।
भजेत रामं मनुजाकृतिं हरिं
    य उत्तराननयत्कोसलान्दिवमिति॥ 8॥

भारतेऽपि वर्षे भगवान्नरनारायणाख्य आकल्पान्त -
मुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोप -
लम्भनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्त -
गतिश्चरति॥ 9॥

तं भगवान्नारदो वर्णाश्रमवतीभिर्भारतीभिः प्रजाभि -
र्भगवत्प्रोक्ताभ्यां साङ्ख्ययोगाभ्यां भगवदनुभा -
वोपवर्णनं सावर्णेरुपदेक्ष्यमाणः परमभक्ति -
भावेनोपसरति इदं चाभिगृणाति॥ 10॥

ओं नमो भगवते उपशमशीलायोपरतानात्म्याय
नमोऽकिञ्चनवित्ताय ऋषिऋषभाय नरनारायणाय
परमहंसपरमगुरवे आत्मारामाधिपतये
नमो नम इति ॥ 11 ॥

गायति चेदम् —
कर्तास्य सर्गादिषु यो न बध्यते
    न हन्यते देहगतोऽपि दैहिकैः।
द्रष्टुर्न दृग्यस्य गुणैर्विदूष्यते
    तस्मै नमोऽसक्तविविक्तसाक्षिणे ॥ 12 ॥

इदं हि योगेश्वर योगनैपुणं
    हिरण्यगर्भो भगवाञ्जगाद यत्।
यदन्तकाले त्वयि निर्गुणे मनो
    भक्त्या दधीतोज्झितदुष्कलेवरः ॥ 13 ॥

यथैहिकामुष्मिककामलम्पटः
    सुतेषु दारेषु धनेषु चिन्तयन्।
शङ्केत विद्वान् कुकलेवरात्ययाद्
    यस्तस्य यत्नः श्रम एव केवलम् ॥ 14 ॥

तन्नः प्रभो त्वं कुकलेवरार्पितां
    त्वन्माययाहम्ममतामधोक्षज।
भिन्द्याम येनाशु वयं सुदुर्भिदां
    विधेहि योगं त्वयि नः स्वभावमिति ॥ 15 ॥

भारतेऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवो
मलयो मङ्गलप्रस्थो मैनाकस्त्रिकूट ऋषभः कूटकः
कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो

वेङ्कटो महेन्द्रो वारिधारो विन्ध्यः शुक्तिमा -
नृक्षगिरिः पारियात्रो द्रोणश्चित्रकूटो गोवर्धनो
रैवतकः ककुभो नीलो गोकामुख इन्द्रकीलः
कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां
नितम्बप्रभवा नदा नद्यश्च सन्त्यसङ्ख्याताः ॥ **16** ॥

एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीना -
मात्मना चोपस्पृशन्ति ॥ **17** ॥

चन्द्रवसा ताम्रपर्णी अवटोदा कृतमाला वैहायसी
कावेरी वेणी पयस्विनी शर्करावर्ता तुङ्गभद्रा कृष्णा
वेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी
रेवा सुरसा नर्मदा चर्मण्वती सिन्धुरन्धः शोणश्च
नदौ महानदी वेदस्मृतिर्ऋषिकुल्या त्रिसामा
कौशिकी मन्दाकिनी यमुना सरस्वती दृषद्वती
गोमती सरयू रोधस्वती सप्तवती सुषोमा
शतद्रूश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी
विश्वेति महानद्यः ॥ **18** ॥

अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्लोहित -
कृष्णवर्णेन स्वारब्धेन कर्मणा दिव्यमानुषनारक -
गतयो बह्व्य आत्मन आनुपूर्व्येण सर्वा ह्येव
सर्वेषां विधीयन्ते यथा वर्णविधानमपवर्गश्चापि
भवति ॥ **19** ॥

योऽसौ भगवति सर्वभूतात्मन्यनात्म्येऽनिरुक्ते -
ऽनिलयने परमात्मनि वासुदेवेऽनन्यनिमित्त -
भक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थि -
रन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः ॥ **20** ॥

एतदेव हि देवा गायन्ति —
अहो अमीषां किमकारि शोभनं
  प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
  मुकुन्दसेवौपयिकं स्पृहा हि नः॥ **21** ॥

किं दुष्करैर्नः क्रतुभिस्तपोव्रतै -
  र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज -
  स्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्॥ **22** ॥

कल्पायुषां स्थानजयात्पुनर्भवात्
  क्षणायुषां भारतभूजयो वरम्।
क्षणेन मर्त्येन कृतं मनस्विनः
  सन्न्यस्य संयान्त्यभयं पदं हरेः॥ **23** ॥

न यत्र वैकुण्ठकथासुधापगा
  न साधवो भागवतास्तदाश्रयाः।
न यत्र यज्ञेशमखा महोत्सवाः
  सुरेशलोकोऽपि न वै स सेव्यताम्॥ **24** ॥

प्राप्ता नृजातिं त्विह ये च जन्तवो
  ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न वै यतेरन्नपुनर्भवाय ते
  भूयो वनौका इव यान्ति बन्धनम्॥ **25** ॥

यैः श्रद्धया बर्हिषि भागशो हवि -
  र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः।

एकः पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्णः स्वयमाशिषां प्रभुः ॥ 26 ॥

सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत्पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छता -
मिच्छापिधानं निजपादपल्लवम् ॥ 27 ॥

यद्यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्म नः स्याद्
वर्षे हरिर्यद्भजतां शं तनोति ॥ 28 ॥

श्रीशुक उवाच
जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक
उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं
परितो निखनद्भिरुपकल्पितान् ॥ 29 ॥

तद्यथा स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्तनो रमणको
मन्दरहरिणः पाञ्चजन्यः सिंहलो लङ्केति ॥ 30 ॥

एवं तव भारतोत्तम जम्बूद्वीपवर्षविभागो
यथोपदेशमुपवर्णित इति ॥ 31 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे जम्बूद्वीपवर्णनं नाम एकोनविंशोऽध्यायः ॥